# Shiv Aarti in Sanskrit PDF (**गंगाधर आरती**)

ॐ जय गंगाधर जय हर जय गिरिजाधीशा।
त्वं मां पालय नित्यं कृपया जगदीशा॥ हर...॥
कैलासे गिरिशिखरे कल्पद्रमविपिने।

**क्रीडा रचयति भूषारंचित निजमीशम्।**
**इंद्रादिक सुर सेवत नामयते शीशम् ॥ हर...॥**

बिबुधबधू बहु नृत्यत नामयते मुदसहिता।
किन्नर गायन कुरुते सप्त स्वर सहिता॥

**धिनकत थै थै धिनकत मृदंग वादयते।**
**क्वण क्वण ललिता वेणुं मधुरं नाटयते ॥हर...॥**

रुण रुण चरणे रचयति नूपुरमुज्ज्वलिता।
चक्रावर्ते भ्रमयति कुरुते तां धिक तां॥

**तां तां लुप चुप तां तां डमरू वादयते।**
**अंगुष्ठांगुलिनादं लासकतां कुरुते ॥ हर...॥**

कपूर्रद्युतिगौरं पंचाननसहितम्।
त्रिनयनशशिधरमौलिं विषधरकण्ठयुतम्॥

**सुन्दरजटायकलापं पावकयुतभालम्।**
**डमरुत्रिशूलपिनाकं करधृतनृकपालम् ॥ हर...॥**

मुण्डै रचयति माला पन्नगमुपवीतम्।
वामविभागे गिरिजारूपं अतिललितम्॥

**सुन्दरसकलशरीरे कृतभस्माभरणम्।**
**इति वृषभध्वजरूपं तापत्रयहरणं ॥ हर...॥**

शंखनिनादं कृत्वा झल्लरि नादयते।
नीराजयते ब्रह्मा वेदऋचां पठते॥

**अतिमृदुचरणसरोजं हृत्कमले धृत्वा।**
**अवलोकयति महेशं ईशं अभिनत्वा॥ हर...॥**

SHRI SHIV CHALISA

ध्यानं आरति समये हृदये अति कृत्वा।
रामस्त्रिजटानाथं ईशं अभिनत्वा॥

**संगतिमेवं प्रतिदिन पठनं यः कुरुते।**
**शिवसायुज्यं गच्छति भक्त्या यः श्रृणुते ॥ हर... ॥**

You can Download Shiv Aarti in other Languages from here shrishivchalisa.com

SHRI SHIV CHALISA